# Divyam Mama Bharatam

# દિવ્યં મમ ભારતમ્

## Document Information

Text title : Divyam Mama Bharatam

File name : divyaMmamabhAratam.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Dr. Ramakant Shukla

Proofread by : Mandar Kulkarni

Acknowledge-Permission: Dr. Ramakant Shukla, Devavani Parishad, Delhi

Latest update : May 10, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2024

*sanskritdocuments.org*

# દિવ્યં મમ ભારતમ્

વિવિધપણ્ડિતમણ્ડલમણ્ડિતા
પ્રકૃતિપુણ્યવિલાસસમાહિતા ।
વિવિધવીરવરાવૃતમણ્ડલા
જયતિ ભારતભૂમિરિયં ભુવિ ॥ ૧॥

યસ્મિંલ્લોકગણઃ સુખેન વસતિ
પ્રાપ્તોઽભયં સર્વદા ।
ગૌરશ્યામવિભેદહીનજનતા
યત્રાસ્તિ કાર્યાકુલા ।
સ્વાતન્ત્ર્યેણ ચમત્કૃતં ચ પરિતો
યત્રાસ્તિ ભૂમણ્ડલમ્ ।
દિવ્યં તન્મમ ભારતં વિજયતે
સંસાર-સમ્ભૂષણમ્ ॥ ૨॥

યેષાં દેશ સુરક્ષણાય નભસિ
પ્રજ્વાલિતે ચાનલે ।
ઝઞ્ઝાવાતસમેતવૃષ્ટિષુ મનો
યાતું સદા પ્રસ્તુતમ્ ।
સન્ત્યેતાદૃશવીર ભાવભરિતા
યસ્યાન્તરાલે ભટાઃ ।
ભવ્યં તન્મમ ભારતં વિજયતે ।
સંસાર-સમ્ભૂષણમ્ ॥ ૩॥

યત્સ્વાતન્ત્ર્યદિનપ્રમોદસમયે
મોદાકુલા મેદિની ।
આશાઃ સૌરભમણ્ડિતા વિજયતે
મુગ્ધસ્ત્રિરઙ્ગો ધ્વજઃ ।

યત્રાનેકવિધૈઃ પ્રમોદકરણૈ-
રાતિથ્યકૃત્યૈર્નવૈઃ ।
માન્યન્તેઽતિથયઃ સ મે વિજયતે
દેશઃ સદા ભારતમ્ ॥ ૪॥

યન્ત્રોદ્યોગ કલાનિકેતનયુતં
વૈજ્ઞાનિકૈઃ પાવિતમ્ ।
કીર્તિશ્રીયુતદેશભક્તચરિતૈ-
શ્ચિત્રં ચમત્કારકમ્ ।
વિદ્યારક્ષણદક્ષપણ્ડિતગણૈ-
ર્નિત્યં સમારાધિતમ્ ।
વિસ્તીર્ણં વસુધાતલે વિજયતે
મે ભારતં ભારતમ્ ॥ ૫॥

યદ્ભૂમૌ પ્રવહન્તિ દેવસરિતા
સાકં નદીનાં ગણાઃ ।
યન્મૂર્દ્ધા હિમશૈલમણ્ડનયુતઃ
પાદાઃ સમુદ્રાદૃતાઃ ।
યન્મૂમિર્નિતરાં સુવર્ણસહિતા
ધાન્યૈઃ સદા દૃશ્યતે ।
દિવ્યં તન્મમ ભારતં વિજયતે
સંસાર-સમ્ભૂષણમ્ ॥ ૬॥

યદ્વૃન્દાવિપિને મુકુન્દચરિતા-
ન્યદ્યાપિ સાક્ષાદિવ ।
યત્કાશીશ્વર વિશ્વનાથકૃપયા
પાપાન્ધકારાપહા ।
યત્તીર્થાનિ સદૈવ પાપદહનં
કુર્વન્તિ શાન્તં જલૈઃ ।
ભવ્યં તન્મમ ભારતં વિજયતે
સંસાર-સમ્ભૂષણમ્ ॥ ૭॥

યસ્મિન્નસ્તિ સહિષ્ણુતાપરિમિતા
તોષઃ પરં રાજતે ।

યત્રાસ્તે ઋજુતા પરં પ્રમુદિતા
યસ્મિંશ્ચ્ શાન્તિઃ પરા ।
વૈપુલ્યં ભજતે ચ યત્ર વિદુષાં
પાણ્ડિત્યપુઞ્જં સદા ।
દિવ્યં તન્મમ ભારતં વિજયતે
સંસાર-સમ્ભૂષણમ્ ॥ ૮॥

જય ભારતભૂમે ! (સંસ્કૃતકાવ્યમ્)
રચના - ડૉ. રમાકાન્ત શુક્લઃ

Proofread by Mandar Kulkarni

*Divyam Mama Bharatam*
pdf was typeset on May 11, 2024

Please send corrections to *sanskrit@cheerful.com*